# Shri Ramanuja Stava Shlokah

# श्रीरामानुजस्तवश्लोकाः

## Document Information

Text title : Shri Ramanuja Stava Shlokah

File name : rAmAnujastavashlokAH.itx

Category : deities_misc, stotra, gurudev

Location : doc_deities_misc

Proofread by : Aruna Narayanan

Description/comments : Ramanujastotraratnavali, Ramanuja Sampradaya. (Prayer to Shri Ramanujacharya)

Latest update : December 25, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# श्रीरामानुजस्तवश्लोकाः

अनेकाचार्यैरनुगृहीताः

॥ श्रीः ॥

॥ श्रीमते रामानुजाय नमः ॥

काषायशोभिकमनीयशिखानिवेशं
दण्डत्रयोज्वलकरं विमलोपवीतम् ।
उद्यद्दिनेशनिभमुल्लसदूर्ध्वपुण्ड्रं
रूपं तवास्तु यतिराज ! दृशोर्ममाग्रे ॥ १॥

नमः प्रणवशोभितं नवकषायखण्डाम्बरं
त्रिदण्डपरिमण्डितं त्रिविधतत्त्वनिर्वाहकम् ।
दयाञ्चितदृगञ्चलं दलितवादिवाग्वैभवं
शमादिगुणसागरं शरणमेमि रामानुजम् ॥ २॥

एतानि तानि भुवनत्रयपावनानि
संसाररोगशकतीकरणौषधानि ।
जिह्वातले मम लिखानि यथा शिलायां
रामानुजेति चतुराण्यमृताक्षराणि ॥ ३॥

(केषाञ्चित् पूर्वाचार्याणाम्)

सनातनसरस्वतीकुमुदसम्पदुज्जृम्भकैः
अपाकृततमोभरैः अपहृताभितापाङ्कुरैः ।
वचोनिचयचन्द्रिकाविलसितैस्स विष्णोः पदे
विशुद्धिमभिदर्शयन् वितनुतां यतीन्दुः श्रियम् ॥ ४॥

महीयांसं हर्षं मनसि वितरीतुं तनुभृतां
उदीतौ द्वौ ताराप्रियतमयतिक्ष्मापरिबृढौ ।
कालादानाद्यो भजति लघुतां पश्यत जनाः

परो दोषापेतः प्रथयति ततो हन्त गुरुताम् ॥ ५॥

(श्रीकौशिककवितार्किकसिंहमिश्राः
आचार्यचम्पूग्रन्थे)

श्रीमान् रामानुजार्यो जगति विजयतामग्रयायी यतीनां
यन्नामोल्लापमात्रात् नरपतितनयां प्रात्यजत् ब्रह्मरक्षः ।
यस्याभाति त्रिदण्डी चिदचिदपि परं चेति तत्त्वत्रयस्य
स्थित्यादिस्थापनार्थं पृथगभिकलिता केतुदण्डत्रयीव ॥ ६॥

यत्कीर्तिः स्वमतप्रवेशसुहृदामङ्गेषु पुण्ड्रायते
स्वान्ते सत्त्वगुणायतेऽथ भगवद्ध्यानाख्यगङ्गायते ।
सन्तोषादधिरोहतां हरिपदं तत्सूत्रयन्त्रायते
जीयादेष यतीश्वरो भुवि चिरं भूयाच्च नस्सपदे ॥ ७॥

वल्मीकप्रभवो मुनिः स्वयमिह प्रोक्तो बुधेन्द्रैः कविः
वल्मीकप्रभवेन्द्र एष यमिनां श्रेष्ठः श्रुतः पण्डितः ।
व्यासस्सोऽपि पराशरेण जनितः श्रीकेशवार्यैः गुरुः
शेषश्च स्वयमित्यबोधि धरणौ को वा यतीन्दोस्समः ॥ ८॥

(श्रीषङ्गीश श्रीनिवासाचार्याः - श्रीयतिपतिवैभवदीपिकायाम्)

उदयगिरिसमृद्धो यः कराग्रेण पृथ्वीं
अपहततिमिरौघामद्भुतार्थप्रकाशाम् ।
अकृत निगममूर्तिः गोनिधिर्मुक्तिनेता
जयति स यतिराजो भास्करो लोकबन्धुः ॥ ९॥

(श्रीमद्भिनवदेशिकवीरराघवाचार्यस्वामिनः,
श्रुतप्रकाशिकाभूमिकायाम्)

इति अनेकाचार्यैरनुगृहीताः श्रीरामानुजस्तवश्लोकाः सम्पूर्णाः ।

॥ श्रीमते रामानुजाय नमः ॥

Proofread by Aruna Narayanan

*Shri Ramanuja Stava Shlokah*

pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*